

# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्

Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

ख्रैस्ताब्दः २०२० वैक्रमाब्दः २०७६ अङ्कः २२ ऑक्टोबर-जनवरी २०२०

गुजरातराज्यस्य माननीयराज्यपालस्य किञ्च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलाधिपतीनां श्रीदेवव्रत-आचार्याणाम् आध्यक्ष्ये राजभवन-गान्धिनगरे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रगतिविषये गोष्ठी समायोजिता आसीत्। अस्यां गोष्ठ्यां माननीयशिक्षणमन्त्री श्रीभूपेन्द्रसिंह-चुडासमा, राज्यशिक्षणमन्त्रि-श्रीमती विभावरीबेनदवेवर्या, अग्रसचिववर्या अञ्जुशर्मवर्या, उच्चशिक्षणविभागवरिष्ठपदाधिकारिणः, विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः, कुलसचिवः डॉ. दशरथ जादव इत्यादयः उपस्थिताः आसन्। अत्र माननीयकुलाधिपतिः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रगतेः छात्रसंख्याकस्थितेः संस्कृतभाषायाः शास्त्राणां चाभिरक्षणाय क्रियमाणयत्नस्य भविष्यदृष्टेश्च विषये विशिष्टं मार्गदर्शनम् अकरोत्।



## मानवसंसाधनविकासमन्त्रिणां श्रीरमेशपोखरियाल"निशङ्क"महोदयानां स्वागतम्



२३.०१.२०२० तमे दिनाङ्के नवदेहल्यां मानवसंसाधनविकासमन्त्रिणाम् श्रीरमेशपोखरियाल"निशङ्क"महोदयानाम् आध्यक्ष्ये "नूतनशिक्षणनीतौ संस्कृतस्य भूमिका" विषये काचित् गोष्ठी समायोजिता आसीत्। तत्र संस्कृतभारत्याः अध्यक्ष-रूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः मानव-संसाधनविकासमन्त्रिणा सह चर्चां कर्तुं गोष्ठ्याम् आहूतः आसीत्। एतस्मिन् सन्दर्भे कुलपतिना विश्वविद्यालयस्य परिचायिकां "सोमज्योतिः" इति वार्तापत्रं च प्रदाय माननीयमन्त्रिणे श्रीसोमनाथसंस्कृतविश्वविद्यालयेन क्रियमाणानि संस्कृतविषयक-कार्याणि विज्ञापितानि। माननीयमन्त्रिणा विश्वविद्यालयस्य प्रगत्यर्थं शुभकामनाः पाठिताः। चित्रे मन्त्रिवर्याणां स्वागतं विधीयते प्रो. गोपबन्धु मिश्रवर्येण।

प्रधानसम्पादकः

**प्रो. गोपबन्धु मिश्रः**

कुलपतिः

प्रकाशकः

**डॉ. दशरथ जादवः**

कुलसचिवः

प्रबन्धसम्पादकः

**रवीन्द्र एस्. काले**

ग्रन्थपालः

सम्पादकः

**डॉ. जानकीशरण आचार्यः**

सहायकाचार्यः (दर्शनम्)

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

Address:
The Editor
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

E-mail: editor.somjyoti@gmail.com

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि
''सोमज्योतिः'' दृष्टुं शक्यते -
www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

**SOMAJYOTIḤ**

FORM IV

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Quarterly
3. Printer's Name : Jalaram Graphics & Offset
   Nationality : Indian
   Address : Behind Hotel Kaveri, Veraval-362266
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Gopabandhu Mishra
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher



# कुलपतिवाक्

वनवासकाले भगवती सीता भगवन्तं श्रीराममुपदिशति -

**धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।**
**धर्मेण लभते सर्वं सर्वसारमिदं जगत्॥** (वा.रा.अरण्य. ९/३०)

तस्मिन्नेव प्रसङ्गे "**देशधर्मस्तु पूज्यताम्**" (अरण्य. ९/२७) इत्युक्त्वा दण्डकारण्ये अपराधं विना वसतो राक्षसानपि हन्तुं यथा श्रीरामो न प्रवर्तेत तथा सा परामृशति। अर्थात् यज्ञभङ्ग- ऋष्युत्पीडनादिहिंसनकर्मसु रता राक्षसा एव हन्तव्याः नेतरे इत्येष धर्म इति सीतादेव्याः विचारः स्पष्ट एव। पुनः सा क्षत्रियधर्मम् इत्थं स्मारयति -

**क्षत्रियाणां तु वीराणां वनेषु नियतात्मनाम्।**
**धनुषा कार्यमेतावदार्तानामभिरक्षणम्।।** (अरण्य. ९/२६)

अत्रेदं विमर्शद्वयं स्पष्टं प्रतिभाति – (i) श्रीराममपि अकारणम् अनर्थकरात् हिंसनात् निवर्तयितुं सीतादेवी क्षमेति नारीणाम् अस्माकं समाजे उत्तमो मान आसीत्, किं च (ii) कस्यापि कृते प्रद्वेषो बहुमानो वा तस्य का जातिः को वर्णः कश्च सम्प्रदायः इत्येतैः कारणैः न भवेदपि तु तस्य सामाजिकानाम् इतरेषां कृते अशिष्टः अथवा शिष्टो व्यवहारः एव तत्र कारणं भवेदिति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिवारगतः प्रत्येकं छात्रः अध्यापकः प्रशासको वा एतादृशीं रामायणीं दृष्टिद्वयीं मनसि निधाय प्रवर्तते। उक्तमप्यस्ति भवभूतिना "**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः**" इति। गुणवत्तां यात्रां (न तु लक्ष्यं) मत्वा विविधगुणरूपेण विद्यमानानि पूजास्थानानि सुतरां संवर्धयितुं सम्पोषयितुं च विश्वविद्यालयोऽसौ प्रवर्तते। अत एव "गार्गी महिलाच्छात्रावासः", "पातञ्जलयोगभवनम्" इति कृतशिलान्यासयोः द्वयोः भवनयोः तथा च इतरेषां वाहनविश्रामालय (पार्किंग्)-जलसंग्राहिणी (टैंक) इत्यादीनां निर्माणकार्येषु अपेक्षिताः गुणाः पूर्णाः स्युरिति यत्यते। तथैव वेद-व्याकरण-साहित्य-पुराण-ज्योतिषविषयेषु सहाचार्य (आसोसिएट प्रोफेसर)- सहायकाचार्य (आसिस्टेंट प्रोफेसर) पदेषु चिताः सम्प्रति विहितयोगदानाश्च नवीनाः अध्यापकाः पूर्ववत् विश्वविद्यालयस्य गौरवाय छात्रहिताय च स्वस्वक्षमतां गुणवत्तां च प्रकटीकृत्य प्रयुञ्जन्तु इति सुतराम् अपेक्ष्यते।

मध्येकालं नवम्बरमासे १० दिनाङ्के देहल्यां संस्कृतभारत्याः विश्वसम्मेलनावसरे तस्याः अखिलभारतीयाध्यक्षरूपेण एष जनः वर्षत्रयस्य कृते चितः इति एतद् गौरवं भगवतः श्रीसोमनाथस्य महत्याः कृपायाः किं च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्णपरिवारजनानां सदिच्छायाः गुजरातप्रान्तगतानां समेषामपि परमस्नेहस्य परिणामरूपेण समागतमिति मन्यते ।

२८ जनवरी दिनाङ्के माननीयकुलाधिपतिः गुजरातराज्यपालमहोदयः आचार्यदेवव्रतवर्यः राजभवने गुजरातस्य शिक्षणमन्त्रिणः श्रीभूपेन्द्रसिंहचुडासमावर्यस्य तथा च राज्यशिक्षणमन्त्रि-श्रीमती विभावरीबेनदवेवर्यायाः अपरेषाम् उच्चशिक्षणविभागवरिष्ठपदाधिकारिणां च उपस्थितौ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रगतेः छात्रसंख्याकस्थितेः संस्कृतभाषायाः शास्त्राणां चाभिरक्षणाय क्रियमाणयत्नस्य भविष्यद्दृष्टेश्च विषये विशिष्टमुपवेशनमायोज्य एतस्य जनस्य कुलसचिवस्य च कृते विशिष्टं मार्गदर्शनं व्यदधादिति परमोत्साहस्यायं विषयो विद्यते।

विविधाः साहित्यदर्शनादिविषयनिष्ठाः कार्यशालाः नाक (NAAC) प्रसङ्गश्च सुखावहाः प्रसङ्गाः सन्ति। गुजरातसर्वकारस्य पक्षतः शैक्षणिकभवनस्योपरितले शिक्षाशास्त्रभवननिर्माणाय, चन्द्रमौलिच्छात्रावासस्य इतोऽपि उपरि एकस्य तलस्य निर्माणार्थम्, उत्तरदिशि भूमेः समतलीकरणार्थं वित्तं सम्प्राप्तमिति प्रसन्नतायाः विषयः एषः। एतेन सह निर्माणकार्ये त्वरायाः तथा च गुणवत्तायाः इत्युभयविधौचित्यरक्षणायापि आह्वानं समायातम्। अग्रे फरवरीमासे ११-१३ दिनाङ्केषु "भाष्यपरम्परा ज्ञानप्रवाहश्च" इति विषयमाश्रित्य अन्ताराष्ट्रियसम्मेलनं गौरवपूर्णरीत्या आयोजनीयम्, किं च १८ फरवरी दिनाङ्के पदवीदानसमारोहश्च करणीयः इति कार्याणि पुरतः विद्यमानानि सन्ति। एतदर्थं सर्वमपि छात्राध्यापकप्रशासनाभिभावकादिगतं वैशिष्ट्यम् उररीकृत्य सुतरां प्रवर्तन्तां सर्वेऽपीति भृशं कामये।

**गोपबन्धु मिश्रः**

कुलपतिः

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०५.१०.२०१९ | माननीयशिक्षणमन्त्रिणः आध्यक्षे गान्धिगनरे आयोजितायां STTE गोष्ठ्यां भागग्रहणम्। |
| १२.१०.२०१९ | IITE गान्धिनगरे शिक्षाशास्त्रिसङ्कायस्य अभ्यासक्रमनिर्माणसन्दर्भे गोष्ठ्याम् उपस्थितिः। |
| १९-२१.१०.२०१९ | TCS संस्थायाः संस्कृतविषयकप्रकल्पे संस्कृतसंवर्धनप्रतिष्ठानेन बैङ्गलूरनगरे आयोजितायां कार्यशालायां भागग्रहणम्। |
| ०९-११-.११.२०१९ | संस्कृतभारत्या नवदेहल्याम् आयोजिते विश्वसंस्कृतसम्मेलने भागग्रहणम्। |
| २०.११.२०१९ | ई.डी.एन्. योजनान्तर्गते शिक्षणविभागस्य अग्रसचिवमहोदयायाः आध्यक्ष्ये नवीनीकरणविषये आयोजितायां गोष्ठ्यां भागग्रहणम्। |
| २४-२५.११.२०१९ | अम्बाजी-कडियादरा-सिद्धपुर-मुडेटी-महाविद्यालयानां निरीक्षणम्। |
| २६.११.२०१९ | रामजानकीसंस्कृतमहाविद्यालय-सरयूरामानन्दसंस्कृतमहाविद्यालय-स्वामिहीरापुरीसंस्कृतमहाविद्यालय-स्वामिनारायणसंस्कृतमहाविद्यालयेषु निरीक्षणम्। |
| २७.११.२०१९ | दर्शनम्-संस्कृतमहाविद्यालयेन आयोजितायां राज्यस्तरीयशास्त्रीयस्पर्धायां मुख्यातिथिरूपेण उपस्थितिः। |
| २९-३०.११.२०१९ | NAAC विषये विश्वविद्यालयपरिसरे आयोजितां कार्यशालायाम् उपस्थितिः। |
| ०४.१२.२०१९ | विश्वविद्यालयस्य निर्माणसमितेः आध्यक्ष्यं निरवहत्। |
| ०५.१२.२०१९ | ई.डी.एन्. योजनान्तर्गते उच्चशिक्षण-तकनीकिशिक्षणविभागस्य अग्रसचिवस्य आध्यक्ष्ये निर्माणविषये आयोजितगोष्ठ्यां भागग्रहणम्। |
| ०६.१२.२०१९ | विश्वविद्यालये आयोजितायाः वित्तसमितेः आध्यक्ष्यं निरवहत्। |
| ०९.१२.२०१९ | विश्वविद्यालयस्य कार्यकारिणिपरिषदः आध्यक्ष्यं निरवहत्। |
| ११.१२.२०१९ | इण्टिग्रेटेड-टीचर्स-एड्यूकेशन्-उपक्रमविषये मानवसंसाधनविकासमन्त्रिणा डॉ. रमेशचन्द्र पोखरियाल "निशङ्क" वर्येण सह मेलनम्। |
| १६-१७.१२.२०१९ | बैङ्गलूरनगरे राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः द्विदिवसीयकार्यशालायां भाग्रग्रहणम्। |
| १९.१२.२०१९ | विश्वविद्यालये आयोजितायाः वाक्यार्थपरिषदः उद्घाटनसत्रे अध्यक्षतां विधाय विशिष्टं व्याख्यानं प्रदत्तम्। |
| २५.१२.२०१९ | दर्शनम्-संस्कृतमहाविद्यालयस्य विंशतितमे वार्षिकोत्सवे मुख्यातिथिरूपेण उपस्थितिः। |
| २५-२७.१२.२०१९ | अगरत्तलायां पुनश्चर्यापाठ्यक्रमे अतिथिरूपेण उपस्थितिः। |
| ०६-०८.१२.२०१९ | विश्वविद्यालये नूतनानां प्राध्यापकानां नियुक्त्यर्थम् आयोजिते साक्षात्कारे उपस्थितिः। |
| ०९.१२.२०१९ | विश्वविद्यालयस्य विद्यापरिषदः कार्यकारिणीपरिषदश्च आध्यक्ष्यं निरवहत्। |
| १०-१२.१२.२०१९ | नागपुरस्थ-कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयेन आयोजिते पञ्चाशत्तमे अखिलभारतीयप्राच्यविद्यासम्मेलने अतिथिरूपेण भागग्रहणम्। |
| २३.०१.२०१९ | "नूतनशिक्षणनीतौ संस्कृतस्य भूमिका" विषये संस्कृतभारत्याः अध्यक्षरूपेण मानवसंसाधनविकासमन्त्रिणा सह चर्चां कर्तुं नवदेहल्याम् उपस्थितिः। |
| २६.०१.२०१९ | विश्वविद्यालये आयोजिते गणतन्त्रदिवसमारोहे उपस्थितिः। |
| २८.०१.२०१९ | माननीयराज्यपालस्य आध्यक्ष्ये राजभवन-गान्धिनगरे आयोजितायां गोष्ठ्यां भागग्रहणम्। |




२५.१२.२०१९ तमे दिनाङ्के छारोडीस्थ-दर्शनम्-संस्कृतमहाविद्यालयस्य विंशतितमे वार्षिकोत्सवे मुख्यातिथिरूपेण भाषमाणः माननीयः कुलपतिः प्रो. गोपबन्धु मिश्रः

## नवरात्रमहोत्सवः सोत्साहं समाचरितः विश्वविद्यालयपरिसरे

श्रीसोमनाथसंस्कृतविश्वविद्यालयः किञ्च भारतविकासपरिषत्-वेरावलम् इत्यनयोः संयुक्तोपक्रमेण विश्वविद्यालयस्य परिसरेऽस्मिन् नवरात्रमहोत्सवस्य आयोजनं ४-५ ऑक्टोबर् २०१९ दिनाङ्कयोः सञ्जातम्। द्वाभ्यां संस्थाभ्यां शताधिकदीपैः देव्याः समाराधना कृता। आरार्तिक्यञ्च कृतम्, ततश्च रासोत्सवः अपि सञ्जातः। अस्मिन् सन्दर्भे विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः, कुलसचिवः डॉ. दशरथ जादवः, विश्वविद्यालयस्य प्राध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राः, भारतविकासपरिषदः अधिकारिणः, वेरावलस्य प्रमुखाः नागराः – इते सर्वे सम्भूय देव्याः महाकाल्याः महालक्ष्म्याः महासरस्वत्याश्च समाराधनम् अकार्षुः। नवदिनानामानन्दः द्वाभ्यां दिवसाभ्यां प्राप्तः। सात्त्विकया भावनया भारतीयसनातनसंस्कृतेः पर्व समाचरितम्। अत्र एतदपि वैशिष्ट्यमासीत् यदत्र संस्कृतभाषया अपि रासोत्सवः सञ्जातः आसीत्। विश्वविद्यालयस्य अधिकारिभिः, छात्रैः, भारतविकासपरिषदः सदस्यैः, वेरावलस्थनागरिकैः सम्भूय सात्त्विकभावनया रासोत्सवः कृतः। एतस्य कार्यक्रमस्य संयोजनं डॉ. पङ्कजकुमार रावलः अकरोत्।



महादेव्याः पूजनरतः माननीयः कुलपतिः प्रो. गोपबन्धु मिश्रः, कुलसचिवश्च डॉ. दशरथ जादवः







## विश्वविद्यालये समायोजितं "फिट्-इण्डिया-धावनम्"

०२.१०.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे महात्मगान्धिनः १५०तम-जन्मजयन्तीकार्यक्रमान्तर्गते " फिट्-इण्डिया-धावनम्" इति कार्यक्रमः समायोजितः आसीत्। अत्र विश्वविद्यालयस्य सर्वैः अधिकारिभिः कर्मचारिभिः छात्रैश्च धावनम्, व्यायामः, योगाभ्यासश्च कृतः। अपि च सर्वेऽपि मिलित्वा प्लास्टिक्-मुक्त-विश्वविद्यालयपरिसराय स्वच्छताकर्म अपि अकुर्वन्। अस्मिन्नवसरे कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, विश्वविद्यालयस्य अधिकारिणः, कर्मचारिणः, प्राध्यापकाः, छात्राश्च समुपातिष्ठन्। अस्य कार्यक्रमस्य संयोजनं डॉ. जयेशमुङ्गरा अकरोत्।



## श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवृत्तः चतुर्दिनात्मकः आवासीयः संस्कृतभाषानैपुण्यवर्गः







संस्कृताध्येतृच्छात्राणां कृते शास्त्राध्ययनेन समं संकृतभाषया निरर्गलतया शुद्धतया च सम्भाषणस्य अभ्यासः नितान्तम् आवश्यकः इति अस्मत्कुलपतिपादानामभिप्रायम् अनुसृत्य २०१९ तमस्य वर्षस्य नवेम्बरमासस्य २७ तमात् दिनात् डिसेम्बरमासस्य प्रथमदिनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये आवासीयः संस्कृतभाषानैपुण्यवर्गः समायोजितः। वर्गममुं सञ्चालयितुं कच्छजनपदात् श्रीधर्मेन्द्र मेमकिया महोदयः, जामनगरात कुमारी कोमल भट्ट महोदया, भावनगरात् श्रीप्रणव राज्यगुरु महोदयः, गांधिनगरतः श्रीजय पाढ महोदयः, अहमदाबादतः श्रीचिराग महेता महोदयः, वडोदरानगराच्च डॉ. योगेश त्रिवेदी महोदयः तज्ज्ञत्वेन आहूताः आसन्। एभिः समं अस्मद्विश्वविद्यालयस्य प्राध्यापकाः डॉ. पङ्कज रावल महोदयः, डॉ. दीपेश विनोद कतिरा, श्रीमेहुल जोषी महोदयः, श्रीजिगर भट्ट महोदयः च वर्गसञ्चालने सहकृतवन्तौ।

विश्वविद्यालयस्य वरीयांसः छात्राः श्रीरवि रादडिया, कुमारी मिरल व्यास, कुमारी कीर्ति शर्मा, श्रीनील दवे, कुमारी पूनम भजगोतर, श्रीहर्षित त्रिवेदी चापि वर्गसंचालने सहकृतवन्तः। वर्गस्यास्य उद्घाटने संस्कृतभारत्याः पश्चिमक्षेत्रसंघटनमन्त्री श्रीहिमाञ्जय पालिवाल महोदयः, विश्वविद्यालयस्य कुलपतयः कुलसचिवाश्च समुपस्थाय वर्गस्य सफलनिर्वहणाय आशीर्वचांसि प्राददुः। संस्कृतं काचित् भाषा। भाषायाः अधिगमः अध्यापनेन समं तत्तद्भाषायाः वातावरणनिर्मित्या भवति इति तत्त्वमनुसृत्य प्रत्यहं प्रातः ६वादनात् रात्रौ १०वादनं यावत् विविधाः कालांशाः आयोजिताः आसन्।

अस्मिन् कालावधौ कदाचित् प्रत्यक्षपाठनेन कदाचित् गणकार्यद्वारा कदाचिच्च क्रीडा-प्रतिभाप्रदर्शनादिभिश्च छात्राः संस्कृतेन व्यवहर्तुं प्रेरिताः। वर्गस्य समापने विश्वविद्यालयसंलग्नमहाविद्यालयस्य प्राचार्याः प्रि. नरेन्द्रकुमार पण्ड्या महाभागाः समुपस्थाय छात्रान् उदबोधयन्। वर्गेऽस्मिन् विश्वविद्यालस्य ११६ छात्राः सहभागम् समूह्य नित्यजीवने संस्कृतेन व्यवहारं कर्तुं प्रेरणां प्राप्नुवन्।

## गणतन्त्रदिवसस्य समाचरणम्




२६.०१.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे भारतदेशस्य गणतन्त्रदिवसस्य समाचरणं सवैभवं कृतमासीत्। प्रातः ८.३० वादने समायोजिते अस्मिन् गणतन्त्रदिवससमारोहे विश्वविद्यालयस्य माननीयकुलपतिना प्रो. गोपबन्धुमिश्रेण ध्वजारोहणं कृतम्। तदनु सर्वैः मिलित्वा राष्ट्रगानं गीतम्। अस्मिन् अवसरे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, अन्ये च प्राध्यापकाः कर्मचारिणः छात्राश्च उपस्थिताः आसन्। कुलपतिः प्रो. गोपबन्धुमिश्रः सन्दर्भेऽस्मिन् प्रसङ्गोचितम् उद्बोधनमपि अकरोत्। महोदयेन उक्तं यत् प्रजासु स्वाधिकारेण सह स्वकर्तव्यस्यापि भावना राष्ट्रभक्तिः वर्तते। अस्माभिः सर्वदा राष्ट्रहिताय चिन्तनीयम्। अत्रावसरे विभिन्नैः छात्रैः राष्ट्रविषये भाषणानि अदीयन्त, राष्ट्रभक्तिभावभरितानि गीतानि च अगीयन्त। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः अस्मिन्नवसरे लयबद्धं योगासनं, व्यायामञ्च प्रादर्शयन्। अस्य गणतन्त्रदिवससमारोहस्य संयोजनं शारीरिकशिक्षकः डॉ. जयेशमुङ्गरा अकरोत्।

## प्रो. गोपबन्धुमिश्रस्य संस्कृतभारत्याः अध्यक्षत्वेन नियुक्तिः

संस्कृतभारत्या नवदेहल्याः छत्तरपुरमन्दिरपरिसरे नवम्बरमासस्य नवम-दशम-एकादशदिनाङ्केषु प्रथमं विश्वसम्मेलनम् आयोजितमासीत्। अत्र विभिन्नेभ्यः स्थानेभ्यः आगतेभ्यः सार्धचतुस्सहस्राधिकसंस्कृतकार्यकर्तृभिः भागग्रहणं कृतम्। अस्मिन्नवसरे संस्कृतभारत्याः नूतनस्य अध्यक्षस्य चयनम् भवत्। तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः वैयाकरणः प्रो. गोपबन्धुमिश्रः अक्ष्यक्षरूपेण चितः अभवत्। अस्य सम्मेलनस्य उद्घाटनं केन्द्रीयमन्त्री डॉ. हर्षवर्धनः कृतवान्। उद्घाटनसत्रे संस्कृतानुरागी सांसदः श्रीमान् प्रतापचन्द्रषडङ्गी संस्कृतभाषया प्रेरणादायकं भाषणं कृत्वा सर्वान् प्रोत्साहितवान्। सम्मेलनस्य द्वितीये दिने भारतस्य उपराष्ट्रपतिः महामहिमा श्रीमान् एम्. वेङ्कय्यनायडुः विशेषभाषणेन सर्वान् उद्बोधितवान्। अध्यक्षरूपेण चयनान्तरं प्रो. गोपबन्धुमिश्रः स्वीयकार्यकारिण्याः परिषदः संरचनाम् अकरोत्। प्रो. गोपबन्धुमिश्रस्य संस्कृतभारत्याः अध्यक्षरूपेण चयनेन न केवलं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य गौरवं वर्धितं परमेतेन समग्रगुजरातराज्यस्यापि गौरवं वर्धितमस्ति। एतदर्थं प्रो. गोपबन्धुमिश्रवर्याय नैकानि अभिनन्दनानि विज्ञाप्यन्ते।

संस्कृतभारत्याः अस्मिन् विश्वसम्मेलने श्रीसोमनाथसंस्कृतविश्वविद्यालयपक्षतः एका प्रदर्शिनी समायोजिता आसीत् यत्र विश्वविद्यालयस्य परिचयः, पाठ्यक्रमाः, प्रकाशनम् इत्यादीनि प्रदर्शितानि आसन्। विश्वविद्यालयस्य ग्रन्थपालः श्रीरवीन्द्रकाले विश्वविद्यालयस्य अस्याः प्रदर्शिन्याः संयोजकरूपेण कार्यम् अकरोत्।




महामहिम-उपराष्ट्रपतेः श्रीवेङ्कयानायुडूवर्यस्य सम्माननं कुर्वन् कुलपतिः प्रो. गोपबन्धु मिश्रः




संस्कृतभारत्याः अखिलभारतीयाध्यक्षत्वेन विश्वसम्मेलने भाषमाणः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः

## थर्ड-अहमदाबाद मेगा एड्यु-फेस्ट इत्यस्मिन् कार्यक्रमे विश्वविद्यालयस्य प्रदर्शनम्



२०१९ तमस्य वर्षस्य डिसेम्बरमासस्य २१-२२ दिनाङ्कयोः अहमदाबादनगरस्य रिवरफ्रन्टक्षेत्रे थर्ड-अहमदाबाद मेगा एड्यु-फेस्ट समायोजितम् आसीत्। तदङ्गतया गुजरातस्थानां नैकासां शैक्षणिकसंस्थानां प्रदर्शनानि योजितानि आसन्। तत्र प्राध्यापकः डॉ. दीपेश विनोद कतिरा, छात्राः श्रीऋषभ देरासरी, श्रीमयूर रावल तथैव च श्रीब्रिजेश दवे इत्येतैः सम्मिल्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिचायिका प्रदर्शनी उपस्थापिता। सहस्रशः सामाजिकाः एतद्वारा श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य विषये ज्ञातवन्तः।

## विद्यार्थिभ्यः सुरक्षाविषयकप्रशिक्षणम्




इण्डियन-रेड-क्रॉस्-संस्थायाः गीरसोमनाथशाखया अथ च गुजरातराज्यशाखया २५.११.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य परिसरे आपत्कालीनप्रबन्धनम् इत्यङ्गतया विद्यार्थिभ्यः कश्चन सुरक्षाविषयकप्रशिक्षणकार्यक्रमः समायोजितः आसीत्। अस्मिन् अवसरे हीरागर-झङ्खनाबेनवर्यया हर्षितदवेवर्येण च सुरक्षाप्रक्षिण-कार्यक्रमारम्भे विद्यार्थिभ्यः प्रासङ्गिकं मार्गदर्शनं कृतमासीत्। अस्मिन् कार्यक्रमे विशेषातिथिरूपेण वेरावलपाटणसंयुक्तनगरपालिकायाः प्रमुखाधिकारी श्रीजतिनमहेता समुपातिष्ठत्। वेरावलनगरपालिकायाः अग्निशमनवाहिन्या प्रात्यक्षिकं प्रायोगिकं च सुरक्षाविषयकप्रशिक्षणं प्रदत्तम्। अस्य कार्यक्रमस्य संयोजनं प्रो. महेन्द्रकुमार दवे अकरोत्।

## श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवृत्ता 'समास'विषयिणी व्याकरणकार्यशाला



'समास'विषयिण्याः व्याकरणकार्यशालायाः दीपप्रज्ज्वालनेन उद्घाटनं कुर्वन्तः कुलपतिः प्रो. गोपबन्धु मिश्रः, प्रो. रबीन्द्रभट्टचार्यः इतरे च महानुभावाः

२०१९तमस्य वर्षस्य डिसेम्बरमासस्य तृतीयात् दिनात् सप्तमं दिनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये 'बहुव्रीहिसमासः' इति विषयमाश्रित्य छात्रोपयोगिनी कार्यशाला प्रावर्तत। कार्यशालायामस्यां विश्वविद्यालयच्छात्रैः सममेव विश्वविद्यालय-संबद्धेभ्यः चतुर्दशभ्यः महाविद्यालयेभ्यः आगताः ५८ छात्रा भागमवहन्। श्रीजगन्नाथसंस्कृत-विश्वविद्यालस्य कुलपतिचराः संस्कृतविभागाध्यक्षचराश्च प्रो. किशोरचन्द्र पाढी महोदयाः समुपस्थाय छात्राणां मार्गदर्शनमकुर्वन्। श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य व्याकरण-विभागाध्यक्षाः प्रो. विनोद कुमार झा महोदयाः, व्याकरणप्राध्यापकः डॉ. दीपेश विनोद कतिरा महोदयः चापि कार्यशालायां मार्गदर्शनमकुर्वन्। वेदव्याकरण-कार्यशालयोः संयुक्तोद्घाटन-समापनकार्यक्रमयोः विश्वविद्यालयस्य कुलपतयः कुलसचिवाः च समुपस्थाय समवेतान् प्रेक्षकान् समुदबोधयन्।



व्याकरणकार्यशालायां पाठयन् प्रो. श्रीकिशोरचन्द्र पाढी वर्यः

## वेदकार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०३.१२.२०१९ तः ०७.१२.२०१९ पर्यन्तं पञ्चदिवसीया निरुक्तस्य प्रथमद्वितीयाध्यायौ अवलम्ब्य एका वेदविषयककार्यशाला समायोजिता आसीत्। अस्यां वेदविभागकार्यशालायां विश्वविद्यालयपरिसरस्य त्रिंशत् छात्रैः सह विविधमहाविद्यालयेभ्यः आगताः षोडशच्छात्राः भागग्रहणं कृतवन्तः। कार्यक्रमस्य प्रारम्भः कुलपतिः प्रो. गोपबन्धुमिश्रः प्रदीपप्रज्वालनपूर्वकम् अकरोत्। तदनु वैदिकमङ्गलाचरणं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रैः कृतम्। अस्य कार्यक्रमस्य उद्घाटनसत्रे माननीयकुलपतिना स्वकीयाध्यक्षीयभाषणे प्रतिपादितं यत् यथा वेदार्थज्ञानाय व्याकरणादिशास्त्राणाम् आवश्यकता विद्यते तथैव निरुक्त-शास्त्रस्यापि महत्त्वपूर्णभूमिका वर्तते। निर्वचनज्ञानाय निरुक्तशास्त्रस्यापेक्षा वर्तते। अनन्तरं कोलकाताविश्वविद्यालयस्य संस्कृतविभागस्य आचार्यः प्रो.रवीन्द्रभट्टाचार्यः अङ्गैः सह वेदानामध्ययनकर्तव्यमिति प्रत्यपादयत्। अस्याः कार्यशालायाः समापनं कुलसचिवस्य डा. दशरथजादवस्य एवञ्च वेदवेदाङ्गसङ्कायाध्यक्षस्य प्रो. देवेन्द्रनाथपाण्डेयस्य आध्यक्षे सम्पन्नम्। कार्यशालायामस्यां कार्यक्रमस्य निदेशकः प्रो. देवेन्द्रनाथ पाण्डेयः, कोलकताविश्वविद्यालयस्य प्रो.रवीन्द्र भट्टाचार्यः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागस्याचार्यः प्रो. रामानुज उपाध्यायः, डॉ. शत्रुघ्न पाणिग्राही च व्याख्यानानि प्रदत्तवन्तः। अस्याः कार्यशालायाः संयोजनं डॉ. शत्रुघ्न पाणिग्राही अकरोत्।




वेदकार्यशालायां भागगृहीतारः छात्राः महानुभावैः सह




वेदव्याकरणकार्यशालयोः समापनसत्रस्य किञ्चन दृश्यम्

## "दर्शनेषु पारिभाषिकपदानां परिचयः" - दर्शनशास्त्रीया कार्यशाला




दर्शनकार्यशालायाः उद्घाटनावसरे डॉ. विश्वनाथ धितालं सम्मानयन् कुलपतिः प्रो. गोपबन्धु मिश्रः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनसङ्कायेन २३ तः २७ दिसम्बर २०१९ दिनाङ्केषु "दर्शनेषु पारिभाषिकपदानां परिचयः" इति विषयं केन्द्रीकृत्य पञ्चदिवसीया दर्शनकार्यशाला समायोजिता आसीत्। अस्याः कार्यशालायाः उद्घाटनसत्रं २३.१२.२०१९ दिनाङ्के प्रातः १०.३० वादनतः ११.३० वादनं यावत् प्रावर्तत। उद्घाटनसत्रे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः अध्यक्षताम् अकरोत्। मुख्यातिथिरूपेण राष्ट्रपतिना महर्षिबादरायणपुरस्कारेण समाभितजः वाराणसीस्थ-काशीहिन्दूविश्वविद्यालय-भारतीयप्रौद्योगिकसंस्थानस्य प्राध्यापकः डॉ. विश्वनाथधितालः समुपातिष्ठत्। अस्मिन् उद्घाटनावसरे अनुस्नातकविभागस्य अध्यक्षा प्रो. अर्चनादुबे, कुलसचिवः डॉ. दशरथजादवः, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अन्ये च प्राध्यापकाः, महाविद्यालयेभ्यः आगताः प्रतिभागिनः छात्राश्च उपस्थिताः आसन्। अध्यक्षरूपेण वदता कुलपतिना उक्तं यत् कस्यापि शास्त्रस्य तलस्पर्शिज्ञानाय तत्तच्छास्त्रस्य पारिभाषिकपदानां ज्ञानं नितराम् आवश्यकं भवति। एकस्य एव पदस्य अर्थः शास्त्रभेदेन भिद्यते। अतः इयं कार्यशाला दर्शनशास्त्रप्रविविक्षूणां छात्राणां कृते नूनं लाभदात्री भविष्यति। अस्य उद्घाटनसत्रस्य सञ्चालनं दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्। अस्यां कार्यशालायाम् एकचत्वारिंशत् छात्रैः पञ्जीकरणं कृतमासीत्। तत्र षड्त्रिंशत् छात्राः श्रीसोमनाथसंस्कृतविश्वविद्यालयात्, द्वौ छात्रौ दर्शनम्-संस्कृतमहाविद्यालयात्, त्रयः छात्राः बीएपीस स्वामिनारायणसंस्कृतमहाविद्यालयात् च अस्यां दर्शनकार्यशालायाम् भागम् अगृह्णन्।



दर्शनकार्यशालायां भागगृहीतारः प्रतिभागिनः महानुभावैः सह

अस्यां कार्यशालायाम् आहत्य दश सत्राणि आसन्। तत्र प्रतिदिनं छात्रेभ्यः कार्यशालायाम् अधीतविषयस्य अभ्यासाय त्रिंशन्निमेषात्मकः कालः निर्दिष्टः आसीत्। कार्यशालेयं अत्यन्तमेव नूतनया पद्धत्या आधुनिकयन्त्रोपकरणैः सञ्चालिता। कार्यशालासञ्चालकेन डॉ. विश्वनाथधितालेन छात्राणां गृहकार्यार्थं गूगल्-क्लासरूम् माध्यमेन छात्रेभ्यः मार्गदर्शनं प्रादायि। अस्यां कार्यशालायां मुख्यतया दर्शनच्छात्राः तथा च दर्शनेतरच्छात्राः सोत्साहं भागं गृहीत्वा दर्शनशास्त्रस्य आवश्यकतां वैशिष्ट्यञ्च विज्ञाय दर्शनशास्त्रीयपारिभाषिकपदानां परिचयं प्रापुः। अस्याः पञ्चदिवसीयकार्यशालायाः समापनं २७.१२.२०१९ दिनाङ्के अपराह्णे चतुर्वादने विश्वविद्यालयस्य सभागारे अवर्तत। अस्मिन् समापनसमारोहे वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः अध्यक्षताम् अकरोत्। विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः विशिष्टातिथिपदं व्यभूषयत्। अस्मिन् समापनसमारोहे कार्यशालायां भागग्रहीतृभ्यः छात्रेभ्यः प्रतिभावप्रकटनकाले उक्तं यत् विश्वविद्यालयेन एतादृश्यः कार्यशालाः अग्रेऽपि आयोजनीयाः भवेयुः। कार्यक्रमान्ते मञ्चस्थमहानुभावैः कार्यशालायां भागग्रहीतृभ्यः प्रतिभागिभ्यः प्रमाणपत्राणि वितरितानि। इत्थमयं समारोपसमारोहः पूर्णतां गतः। अस्याः दर्शनकार्यशालायाः संयोजकौ दर्शनसङ्कायाध्यक्षा डॉ. बी. उमा महेश्वरी, दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः च आस्ताम्।

## मूल्याङ्कनमहोत्सवः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सत्रार्द्धपरीक्षायाः उत्तरपुस्तिकामूल्याङ्कनं विश्वविद्यालयपरिसरे २१ ऑक्टोबरतः २४ ऑक्टोबर २०१९ पर्यन्तं कृतमासीत्। विश्वविद्यालयेन इदं कर्म "मूल्याङ्कनमहोत्सवः" इति नाम्ना समाचरितः। अत्र विश्वविद्यालयसंलग्नानां महाविद्यालयानां प्रायः शताधिकाः प्राध्यापकाः, विश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः भागमगृह्णन्। अस्य मूल्याङ्कनमहोत्सवस्य आयोजनाय परीक्षाधिकारी डॉ. योगेश पटेलः तथा च परीक्षाविभागस्य कर्मचारिणः विशेषरूपेण योगदानम् अकार्षुः।



मूल्याङ्कनमहोत्सवस्य किञ्चन दृश्यम्

## सोमज्योतिः इति विश्वविद्यालयवार्तापत्रस्य लोकार्पणम्




विश्वविद्यालयस्य "सोमज्योतिः" इति वार्तापत्रं लोकार्पयन्तः अतिथयः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "सोमज्योतिः" इत्याख्यवार्तापत्रस्य विंशैकविंशतमाङ्कयोः लोकार्पणं ०७.१२.२०१९ दिनाङ्के प्रभासज्योतिः इति शैक्षणिकभवनस्य सभागारे वेदव्याकरणयोः कार्यशालयोः समापनावसरे समजायत। अस्मिन्नवसरे श्रीलालबहादुरराष्ट्रिसंस्कृतविद्यापीठस्य ज्योतिषप्राध्यापकः डॉ. रामराज उपाध्यायः, बडौदासंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. रामपालशुक्लः, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, कुलसचिवः डॉ. दशरथजादवः, वेदविभागाध्यक्षः प्रो. विनोदकुमारझा, सोमज्योतिषः सम्पादकः दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः, प्रबन्धसम्पादकः ग्रन्थपालः श्रीरवीन्द्रकाले, अन्ये च प्राध्यापकाः उपस्थिताः आसन्। अस्मिन्नवसरे कुलसचिवेन उक्तं यत् इदं सोमज्योतिः विश्वविद्यालयस्य दर्पणः अस्ति। अत्र न केवलं विश्वविद्यालयेन प्रचालितानां विभिन्नानां प्रकल्पानां विवरणं संस्कृतभाषया सङ्गृहीतं भवति परं विश्वविद्यालयसंलग्नमहाविद्यालयानां वार्ताः अपि अत्र प्रकाशिताः भवन्ति, येन छात्राः पाठकाश्च नैकविधविवरणं प्राप्नुवन्ति। प्रो. पाण्डेयमहाभागेन अभाणि यत् अस्मिन् सोमज्योतिषि यावत्यः वार्ताः सन्ति ताः वार्ताः कश्चन छात्रः पठति तर्हि तस्य नूनं शब्दसम्पत्तिः संवर्धते।

## पुराणधर्मशास्त्रीया कार्यशाला

नवम्बरमासस्य २० दिनाङ्कात् २३ दिनाङ्कं यावत् नटपुरस्थ-श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये दिनचतुष्टयसाध्या पुराण-धर्मशास्त्रकार्यशाला श्रीसोमनाथसंस्कृतविश्वविद्यालयः एवञ्च श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः इत्यनयोः संयुक्तोपक्रमेण "श्रीमद्भागवतमहापुराणं तदागमस्तत्स्वाध्यायश्च" इति विषयमधिकृत्य कुलपतेः प्रो. गोपबन्धुमिश्रस्य प्रेरणया पद्मश्रीडाह्याभाईशास्त्रिणः मार्गदर्शनेन च समजायत। अस्यां कार्यशालायां स्वशास्त्रे कृतभूरिपरिश्रमाः विद्वांसः प्रदत्तविषयमाश्रित्य व्याख्यानानि प्रायच्छन्। तेषां व्याख्यानैः स्वाध्यायकर्मभिश्च विविधविद्यालयेभ्यः आगताः विद्यार्थिनः नितरां ज्ञानान्विताः मुदमलभन्त। एतस्यां कार्यशालायां मुख्यसंयोजकरूपेण पुराणसङ्कायाध्यक्षः डॉ. पङ्कजकुमाररावलः अथ च स्थानीयसंयोजकरूपेण ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलालभोगायता स्वदायित्वम् निरवहत्। अस्यां पुराणकार्यशालायाम् अमीषां विदुषां वैदुष्यपूर्णानि व्याख्यानानि अभूवन् – डॉ. नरेन्द्रकुमार पण्ड्या, कृष्णदत्त शास्त्री, डॉ. योगेशभाई पण्ड्या, महेशजोषी, डॉ. पङ्कजकुमार रावलः, डॉ. अमृतलाल भोगायता, हेमेन्द्रभाई दवे, डॉ. कृष्णप्रसाद निरौला, डॉ. क्षितीश्वरनाथ पाण्डेयः, भद्रेश व्यासः, डॉ. कृणालभाई जोषी च।



## वाक्यार्थपरिषदः उद्घाटनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षम् अध्यापकानां छात्राणां शास्त्रज्ञानसम्पादनाय वाक्यार्थपरिषत् समायोज्यते। अस्मिन् २०१९-२० तमे शैक्षिकवर्षे अस्याः परिषदः उद्घाटनसत्रसमन्वितं प्रथमाधिवेशनं १९.१२.२०१९ दिनाङ्के कुलपतेः प्रो. गोपबन्धुमिश्रस्य आध्यक्ष्ये समभवत्।




अस्मिन् अवसरे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातक-विभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, व्याकरण-विभागाध्यक्षः प्रो. विनोदकुमारझा, अन्ये प्राध्यापकाः छात्राश्च समुपातिष्ठन्। अस्य उद्घाटनसत्रस्य आरम्भः दीपप्रज्वालनेन जातः, तदनु अस्याः परिषदः संयोजकेन दर्शनप्राध्यापकेन डॉ. जानकीशरण आचार्येण सर्वेषां स्वागतं विधाय अस्याः वाक्यार्थपरिषदः प्रास्ताविकं भाषणं व्यधायि। अस्मिन् प्रथमाधिवेशने वैयाकरणः प्रो. विनोदकुमारझा "समासादिवृत्तिविमर्शः" इति विषयं पूर्वोत्तरपक्षाभ्याम् अमण्डयत्। स्वीयाध्यक्षीयोद्बोधने कुलपतिः प्रो. गोपबन्धुमिश्रः "कृत्प्रत्ययानां विश्लेषणम्" इति विषयम् आदाय सर्वोपकारकं छात्रप्रेरकं सरलं व्याख्यानम् अकरोत्। २०१९-२० शैक्षिकवर्षे अस्याः वाक्यार्थपरिषदः संयोजकरूपेण दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः, शारीरिकशिक्षकः डॉ. जयेशमुङ्गरा च कार्यं कुरुतः।



डॉ. गणेशहेगडेवर्यस्य सम्माननम्

## विश्वविद्यालयपरिसरे सम्पन्ना द्विदिवसीया NAAC कार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा २८-११-२०१९ तः २९-११-२०१९ दिनाङ्कं यावत् Institutional Accreditation Manual for Self-Study Report of Sanskrit Universities (NAAC) इति विषयमादाय द्विदिवसात्मिका कार्यशाला श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे समायोजिता आसीत्। विश्वविद्यालयस्य "त्रिवेणी"प्राशासनिकभवने २८-११-२०१९ तमे दिनाङ्के प्रातः ११:०० वादने अस्याः उद्घाटनं प्रावर्तत। अस्मिन् उद्घाटनकार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्षं निरवहत् एवं च कुलसचिवः डॉ. दशरथजादवः स्वागतकर्तृरूपेण उपस्थितः आसीत्। कार्यशालायामस्यां विषयविशेषज्ञरूपेण राष्ट्रिय-मूल्याङ्कन-प्रत्यायन-परिषद्-बेङ्गालुरुतः उपपरामर्शकः डॉ. गणेशहेगडेमहोदयः उपस्थितः आसीत्।




राष्ट्रियमूल्याङ्कनप्रत्यायनकाले कथम् अधिकान् अङ्कान् प्राप्य उत्तमः स्तरः अधिगन्तुं शक्यते इति विषये डॉ. गणेशहेगडेमहोदयेन उत्तमरीत्या व्याख्यायानानि PPT माध्यमेन प्रदत्तानि। NAAC कृते कथं निर्दिष्टे समये कार्यं साधनीयमिति विषये सम्यक् मार्गदर्शनम् अपि विहितम्। अस्याः कार्यशालायाः समापनं २९-११-२०१९ तमे दिनाङ्के सायं ०५:०० वादने "त्रिवेणी" प्राशासनिकभवने अवर्तत। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्ष्यं निरवहत्। अस्याः कार्यशालायाः संयोजनं संशोधनाधिकारी डॉ. कार्तिकपण्डया अकरोत्।

## मतदातृजागृतिकार्यक्रमः

०५.१२.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे मतदातृजागृतिकार्यक्रमः समायोजितः आसीत्। अस्मिन् कार्यक्रमे प्रान्ताधिकारी श्रीनितिनसाङ्गवानः विशेषरूपेण उपस्थाय प्रश्नोत्तरमाध्यमेन उपस्थितानां छात्राणां नागरिकाणां च मार्गदर्शनम् अकरोत्। तेन उक्तं यत् प्रजातान्त्रिकप्रणाल्यां मतदातॄणां महती भूमिका भवति। वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः अस्मिन् कार्यक्रमे अभ्यागतानां महानुभावानां शाब्दिकं स्वागतं व्याहरत्। अस्मिन्नवसरे दिव्याबेन गामित, विराजबेन करमटा इत्यादिमहानुभावाः अपि समुपातिष्ठन्। अस्मिन् मतदातृजागृति-कार्यक्रमे विद्यार्थिभ्यः क्रीडामाध्यमेन मतदानविषये मार्गदर्शनं दत्तम्। सर्वेऽपि छात्राः सोत्साहम् अत्र भागम् अगृह्णन्। अस्य कार्यक्रमस्य सञ्चालनम् आधुनिकविद्यासङ्कायाध्यक्षः डॉ. डी. एम्. मोकरिया अकार्षीत्।



## NAAC कार्यशालायां कुलपतेः उपस्थितिः



राष्ट्रिय-मूल्याङ्कन-प्रत्यायन-परिषद्-बेङ्गालुरु द्वारा १६-१२-२०१९ तः १७-०१२-२०१९ दिनाङ्कं यावत् Institutional Accreditation Manual for Self-Study Report of Sanskrit Universities) इति विषयमादाय द्विदिवसात्मिका कार्यशाला राष्ट्रिय-मूल्याङ्कनप्रत्यायन-परिषद्-बेङ्गालुरुपरिसरे समायोजिता आसीत्। अस्यां कार्यशालायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः तथा च संशोधनाधिकारी डॉ. कार्तिकपण्ड्या भागग्रहणम् अकुरुताम्। अस्याः कार्यशालायाः उद्घाटनं १६-०१२-२०१९ तमे दिनाङ्के प्रातः १०:०० वादने तथा च समापनं २७-०६-२०१९ तमे दिनाङ्के सायं ०५:०० वादने राष्ट्रिय-मूल्याङ्कन- प्रत्यायन-परिषदः बेङ्गालुरुपरिसरे जातम्।



## ग्रन्थालयविभागपक्षतः प्रशिक्षणगोष्ठी

३१.१२.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ग्रन्थालयविभागपक्षतः शोधगङ्गाप्रकल्पः, साहित्यिकचौर्यम्, इन्फ्लिबनेट् चेति विषये एका प्रशिक्षणगोष्ठी विश्वविद्यालयस्य सभागारे समायोजिता आसीत्। अस्यां प्रशिक्षणगोष्ठ्यां विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धु मिश्रः, सर्वेऽपि प्राध्यापकाः, छात्राश्च उपस्थिताः आसन्। ग्रन्थपालः श्रीरवीन्द्रकाले विद्यावारिधिशोधनिबन्धानां सङ्ग्रहप्रकल्प-शोधगङ्गाविषये मार्गदर्शनं विधाय शोधार्थिभिः कृतस्य शोधकार्यस्य निबन्धरूपेण प्राप्तिः शोधगङ्गा इत्याख्ये सङ्ग्रहालये निश्शुल्करूपेण उपलभ्यते। शोधकार्यरतैः छात्रैः कथं शोधनिबन्धस्य प्रकरणविभागं कृत्वा शोधगङ्गा इत्याख्ये सङ्ग्रहालये स्वशोधनिबन्धः स्थापनीयः इति विषये सम्यक् अबोधयत्। अनेन सह ग्रन्थपालः साहित्यिकचौर्यविषयेऽपि उपस्थितान् समबोधयत् यत् विश्वविद्यालयानुदानायोगस्य नियमानुसारं शोधार्थिभिः स्वशोधप्रबन्धलेखने साहित्यिकचौर्यं न भवेत् इत्यत्र अवधानं दातव्यम्। एतद्विषये उपलब्धान् तन्त्रांशान् अपि ग्रन्थपालः प्रात्यक्षिकं कृत्वा प्रादर्शयत्।

## विद्यावारिधिशोधचर्चासमितिः (Research Discussion Committee of Ph.D.)

विश्वविद्यालयानुदानयोगस्य नियमानुसारं श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन २०१९-२०२० इति शैक्षणिकवर्षस्य कृते विद्यावारिधि-प्रवेशपरीक्षायाः आयोजनं कृतम्। विद्यावारिधिप्रवेशपरीक्षार्थं नवाशीतिः (८९) शोधार्थिनः पञ्जीकरणं कृतवन्तः। तेषां विंशतिः (२०) शोधार्थिनः उत्तीर्णाः जाताः। २०१८-२०१९ शैक्षणिकवर्षस्य द्वौ तथा च २०१९-२०२० शैक्षणिकवर्षस्य विंशतिः शोधार्थिनः, एवमाहत्य द्वाविंशतिः शोधार्थिनां कृते विद्यावारिधिकार्यशालायाः (Ph.D. Course Work) आयोजनं २०-०१-२०२० तः २९-०१-२०२० यावत् परिसरे जातम्। तत्र नवदश (१९) शोधार्थिनः उपस्थिताः आसन्। तदनन्तरं तेषां शोधार्थिनां कृते शोधचर्चा-समितेः (Research Discussion Committee) आयोजनं कृतम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः समितेः आध्यक्ष्यं निरवहत्। तत्र क्रान्तिगुरुश्यामजीकृष्णवर्मा-कच्छविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. कश्यपत्रिवेदी विषयनिष्णातरूपेण उपस्थितः आसीत्। विद्यावारिधिशोधचर्चासमितेः संयोजनं सभ्यसचिवरूपेण संशोधनाधिकारी डॉ. कार्तिकपण्ड्या अकरोत्।



## राज्यस्तरीयशास्त्रीयस्पर्धायां विश्वविद्यालयच्छात्राणां प्रदर्शनम्

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानायाः अखिलभारतीय-शास्त्रीयस्पर्धायाः अङ्गतया गुजरातराज्ये २६ तः २८ नवम्बर २०१९ दिनाङ्केषु श्रीगुजरातप्रदेशसंस्कृतपाठशालामण्डलेन छारोडीस्थे "दर्शनम्" संस्कृत-महाविद्यालये राज्यस्तरीयशास्त्रीयस्पर्धायाः आयोजनं कृतम्। तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य चतुर्दशच्छात्राः विभिन्नेषु शास्त्रीय-विषयेषु भागम् अग्रहीषत। तेषु छात्राः पुरस्कारभाजाः अभूवन्।

| | | |
|---|---|---|
| १. कृष्णकुमारपाण्डेयः (आचार्यः १) | वेदभाष्यभाषणम् | स्वर्णपदकम् |
| २. रावलः मयूरः (आचार्यः २) | ज्योतिषभाषणम् | स्वर्णपदकम् |
| ३. देरासरी ऋषभः (आचार्यः २) | साहित्यभाषणम् | स्वर्णपदकम् |
| ४. देरासरी ऋषभः (आचार्यः २) | समस्यापूर्तिः | कांस्यपदकम् |
| ५. जोषी ध्रुविनः (आचार्यः १) | सांख्ययोगभाषणम् | रजतपदकम् |
| ६. रादड़िया रविः (आचार्यः १) | व्याकरणभाषणम् | कांस्यपदकम् |
| ७. पण्ड्या रिधमः (आचार्यः १) | न्यायशलाका | कांस्यपदकम् |
| ८. प्रणवः कश्यपः (आचार्यः १) | वेदान्तभाषणम् | कांस्यपदकम् |
| ९. राजकुमार झा (आचार्यः १) | जैनबौद्धभाषणम् | कांस्यपदकम् |

श्रीसोमनाथसंस्कृतविश्वविद्यालयपक्षतः एतस्य छात्रग्रामस्य नेतृत्वं ज्योतिषप्राध्यापकेन श्रीनित्यानन्दओझावर्येण अकारि।



## सम्पन्ना विद्यावारिधिकार्यशाला (Ph. D. Coursework)




विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०१९-२० तमशैक्षिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं १५-१०-२०१९ एवं च २१-१०-२०१९ दिनाङ्के अकारि। अस्यां परीक्षायां विंशतिशोधार्थिनः उत्तीर्णाः अभूवन्, येषां कृते विश्वविद्यालयानुदानायोगनियमानुगुणं षष्टिहोरात्मिका विद्यावारिधिकार्यशाला श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे २०-०१-२०२० तः २९-०१-२०२० यावत् समायोजिता। अस्यां कर्यशालायां नवदश शोधचिकीर्षवः उपस्थिताः आसन्। अत्र विशिष्टवक्तृरूपेण प्रो. गोपबन्धु मिश्रः, प्रो. देवेन्द्रनाथ पाण्डेयः, प्रो. अर्चना दुबे, प्रो. विनोद कुमार झा, डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. महेन्द्रकुमार दवे, डॉ. शत्रुघ्न पाणिग्राही, डॉ. पङ्कजकुमार रावलः, डॉ. डी. एम. मोकरिया, डॉ. दीपेश कतिरा, डॉ. कार्तिक पण्ड्या, डॉ. योगेश पटेलः, डॉ. बी. उमामहेश्वरी, डॉ. जानकीशरणः आचार्यः, डॉ. जयेशकुमार मुंगरा, डॉ. रमेशचन्द्र शुक्लः, प्रो. पीटरशार्फ़, श्रीरवीन्द्र काले, श्रीहरेश खेरः च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। अस्याः कर्यशालायाः संयोजनं डॉ. कर्तिक पण्ड्या अकरोत्।

## प्राध्यापकानां विशिष्टाः सिद्धयः

अर्वाचीनसंस्कृतसाहित्यपरिषद्-वडोदरा एवञ्च प्राच्यविद्यामन्दिरम्-महाराजासयाजीरावबड़ौदाविश्वविद्यालयेन १.१.२०२० दिनाङ्के प्राच्यविद्या-मन्दिरे भारतगौरव-पण्डित-के.एस्.रामस्वामिमहोदयस्य पुण्यस्मृतौ आयोजिते सारस्वतसम्मानकार्यक्रमे विश्वविद्यालयस्य दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः उत्कृष्टग्रन्थप्रणयनाय "भारतगौरव-पण्डित-के.एस्.रामस्वामिसम्माननम्" इति पुरस्कारेण सभाजितः। तदर्थं विश्वविद्यालयपरिवारेण शुभकामनाः प्रकटीक्रियन्ते।



छारोडीस्थेन दर्शनम्-संस्कृतमहाविद्यालयेन २५.१२.२०१९ दिनाङ्के महाविद्यालयस्य विंशतिमहोत्सवः समाचरितः। अस्मिन् सन्दर्भे संस्कृतसेवकानां सम्माननस्य कार्यक्रमः अपि समायोजितः आसीत्। तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालित-संस्कृतमहाविद्यालयस्य पुराण-प्राध्यापकः पुराणसङ्कायाध्यक्षश्च डॉ. पङ्कजकुमार रावलः सारस्वतसम्माननेन सभाजितः। तदर्थं विश्वविद्यालयपरिवारेण शुभकामनाः प्रकटीक्रियन्ते।



## विश्वविद्यालयच्छात्राणां विविधक्षेत्रेषु प्रदर्शनम्



**योगमहाकुम्भः-२०१९** - गुजरातसर्वकारेण २४.११.२०२० दिनाङ्के जूनागढे समायोजिते जनपदस्तरीये योगमहाकुम्भ-२०१९ इत्याख्ये प्रदर्शने श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः योगविषयकं सुष्ठु प्रदर्शन विधाय पुरस्कारभाजः अभूवन्। अधोलिखिताः छात्राः अत्र भागम् अगृह्णन् –

१. रादडीया रविः - प्रथमस्थानम्
२. लाखणोत्रा चन्द्रा - प्रथमस्थानम्
३. सत्यव्रत पाण्डेयः- द्वितीयस्थानम्
४. मारिया दिव्या - द्वितीयस्थानम्
५. पण्ड्या रीटा - तृतीयस्थानम्

**छत्तीसगढे** समयोजिते राष्ट्रस्तरे "ओपन्-नेशनल्" स्पर्धायां त्रिवेदी हर्षलः तृतीयक्रमाङ्कं प्राप्नोत्। विभिन्नस्पर्धासु भागगृहीतवद्भ्यः सर्वेभ्यः छात्रेभ्यः विश्वविद्यालयपक्षतः सोमज्योतिःपक्षतश्च अभिनन्दनानि विज्ञाप्यन्ते।

## छात्राणां NET परीक्षासु साफल्यम्



दिसम्बर-२०१९ विश्वविद्यालय- अनुदानायोगस्य राष्ट्रिय-पात्रतापरीक्षायां (UGC NET) श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य आचार्य- प्रथमवर्षीयच्छात्रः रजनीश- कुमारपाण्डेयः साफल्यम् अवाप्नोत्। इतरे उत्तीर्णाः छात्राः सन्ति - करिश्मा हमीर, सञ्जय भोगायता, सागर देरासरी, अरुणकुमार पाण्डेयः (JRF) राहुलकुमार झा। विश्वविद्यालयः सर्वान् छात्रान् शुभकामनाभिः सभाजयति।

## विश्वविद्यालयस्य नूतनं प्रकाशनम्

प्रकाशनविभागद्वारा ०१-१०-२०१९ तः ३१-१२-२०१९ यावत् निम्नलिखितानि प्रकाशनानि जातानि।

१. शिशुपालवधस्य सन्देहविषौषधि-सर्वङ्कषाटीकयोर्विवेचनात्मकम् अध्ययनम् = संशोधकः सम्पादकश्च – डॉ. अमृतलालः भोगायता
२. University Diary-२०२०
३. University Planner-२०२० ४. Calendar-२०२०

## पश्चिमक्षेत्र-अन्तर्विश्वविद्यालय-वॉलीबॉलस्पर्धायाः प्रशिक्षणशिबिरं तत्र भागग्रहणञ्च

१६ तः २० दिसम्बर २०१९ पर्यन्तम् RTM नागपुरविश्वविद्यालये पश्चिमक्षेत्रान्तर्ग-विश्वविद्यालयानाम् अन्तर्विश्वविद्यालय-बॉलीबॉलस्पर्धा आयोजिता आसीत्। तत्र श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य क्रीडकाः सम्यक् प्रदर्शनं कुर्युः एतदर्थं ११ तः १४ दिसम्बर २०१९ यावत् क्रीडाकानां कृते प्रशिक्षणशिबिरस्य आयोजनं कृतम् आसीत्। एतस्य प्रशिक्षणशिबिरस्य संयोजकत्वं डॉ. जयेश मुङ्गरा निरवहत्। RTM नागपुरविश्वविद्यालये समायोजितायां वॉलीबॉलस्पर्धायां विश्वविद्यालस्य छात्रैः सम्यक् प्रदर्शनं विहितम्।

## अखिलभारतीयसंस्कृतच्छात्रप्रातिभासमारोहः

तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठेन जनवरिमासस्य २८ दिनाङ्कतः ३१ दिनाङ्कं यावत् चतुर्दशः अखिलभारतीयसंस्कृतच्छात्रप्रातिभासमारोहः समायोजितः पञ्चविंशत्यधिकं पञ्चशतं छात्राः भागम् अगृह्णन्। अस्मिन् समारोहे वेदान्त-न्याय-साहित्यादिविषयैः सह रसप्रश्नः-समस्यापूर्ति-अन्त्याक्षर्यादि-शैक्षिकस्पर्धासु तथा च संस्कृत एकपात्राभिनयः जनपदनृत्यं संस्कृतगायनादिषु सांस्कृतिकस्पर्धासु श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नव छात्राः भागम् अगृह्णन्। तत्र एतैः छात्रैः उत्कृष्टं प्रदर्शनं प्रदर्शितम्। तस्मिन् पुराणेतिहासभाषणस्पर्धायां पुरस्कारं प्राप्तम्। एवञ्च जनैः एकपात्राभिनयस्यापि महती प्रशंसा कृता। अपरञ्च रसप्रश्नस्पर्धायां छात्राणां पञ्चमं स्थानं समागतम्। एतस्य छात्रसमवायस्य मार्गदर्शनं साहित्यविभागध्यक्षा प्रो.अर्चना दुवे महोदयाभिः अकरोत्।



अनुस्नातकविभागाध्यक्षया सह छात्राः

## विश्वविद्यालये आरोग्यकेन्द्रस्य उद्घाटनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे १७.०१.२०२० दिनाङ्के आरोग्यकेन्द्रस्य उद्घाटनं सञ्जातम्। अत्र अध्यक्षरूपेण कुलपतिः प्रो. गोपबन्धु मिश्रः, स्वागतकर्ता डॉ. दशरथ जादवः, विशेषातिथिरूपेण इण्डियन-मेडिकल-एसोशिएशन्-वेरावलप्रमुखः डॉ. विरेन परीखः, डॉ. हार्दिकशाहः, प्रख्यातवैद्या डॉ. निशाबेनगोहेल च उपस्थिताः आसन्। डॉ. निशाबेन गोहेल प्रतिसप्ताहं मङ्गलवासरे शनिवासरे च विश्वविद्यालयस्य आरोग्यकेन्द्रे चिकित्सापरामर्शं ददाति। अवसरेऽस्मिन् विश्वविद्यालये नवनियुक्तानां प्राध्यापकानां सम्माननकार्यक्रमः अपि समायोजितः आसीत्।






## मतदातृदिवसः समाचरितः विश्वविद्यालयपरिसरे

२५.०१.२०२० दिनाङ्के राष्ट्रियमतदातृदिवसः विश्वविद्यालयपरिसरे समाचरितः। सोमनाथविधानसभाक्षेत्रस्य अयं मतदातृदिवसः जनपदस्तरीय आसीत्। अत्र गीरसोमनाथ-जनपदस्य समाहर्ता श्रीअजयप्रकाशः उपस्थितः आसीत्। कुलपतिः प्रो. गोपबन्धुमिश्रस्य आध्यक्ष्ये समायोजितस्य अस्य कार्यक्रमस्य संयोजनं डॉ. डी. एम्. मोकरियावर्यः अकरोत्।

## प्राध्यापकानाम् उपलब्ध्यः शैक्षिकगतिविधयश्च

**प्रो. महेन्द्रकुमार दवे**

- २५.११.२०१९ - इण्डियरेडक्रोससोसायटी-गीरसोमनाथशाखाद्वारा विश्वविद्यालये आयोजितसुरक्षाप्रशिक्षणकार्यक्रमस्य संयोजनं कृतम्।
- २.१२.२०१९ – सौराष्ट्रविश्वविद्यालये पीएच्.डी. वाक्परीक्षायां निर्णेतृरूपेण कार्यं सम्पादितम्।
- हेमचन्द्राचार्य-उत्तरगुजरातविश्वविद्यालये पीएच्.डी. वाक्परीक्षायां निर्णेतृरूपेण कार्यं विहितम्।
- प्रकाशनम् – "याज्ञवल्क्यस्मृतिः – एकमध्ययनम्" – संस्कृतसाहित्य-अकादमी गान्धीनगरम्।
- संस्कृतसाहित्याकादमी-गान्धीनगरद्वारा श्रेष्ठलेखकेभ्यः प्रदीयमानेषु पुरस्कारेषु विवेचनक्षेत्रे तृतीयं पुरस्कारं प्राप्तम्।

**डॉ. कार्तिकपण्ड्या** (संशोधनाधिकारी)

- २८-२९.११.२०१९ यावत् विश्वविद्यालयपरिसरे समायोजिताः द्विदिवसात्मिकायाः NAAC कार्यशालायाः संयोजकत्वं विहितम्।
- १६-१७.१२.२०१९ यावत् राष्ट्रीय-मूल्याङ्कन-प्रत्यायन-परिषदः बेङ्गलुरुपरिसरे समायोजितायाः द्विदिवसात्मिकायाः N A A C कार्यशालायां विश्वविद्यालयपक्षतः भागग्रहणं विहितम्।
- All India Survey on Higher Education Survey (MHRD, New Delhi) २०१९-२० कृते विश्वविद्यालयस्य नोडल-अधिकारिरूपेण कार्यं व्यधायि।
- NAAC कृते विश्वविद्यालयस्य संयोजकरूपेण कार्यं व्यधायि।
- विश्वविद्यालयस्य प्रकाशनविभागद्वारा एकस्य ग्रन्थस्य प्रकाशने तथा च प्रकाशनविभागद्वारा विश्वविद्यालय-दैनन्दिनी-पञ्चाङ्ग-योजनाकर्ता-२०२० प्रकाशने सम्पादकरूपेण समन्वयकरूपेण च कर्यमकारि।

**डॉ. जानकीशरण आचार्यः**

- १८ तः १९ ऑक्टोबर २०१९ – तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य अद्वैतवेदान्तविभागेन आयोजितायां द्विदिवसीयायां राष्ट्रियसङ्गोष्ठ्याम् "भगवद्गीतायां त्वम्पदार्थनिरूपणम्" इति विषये व्याख्यानं प्रदत्तम्।
- १५ तः १७ ऑक्टोबर २०१९ – नवदेहलीस्थ BAPS स्वामिनारायण-अनुसन्धान-संस्थानम् अथ च भारतीयदार्शनिकपरिषत् इति संस्थयोः संयुक्ततत्त्वावधाने आयोजिते राष्ट्रियपरिसंवादे "ब्रह्मसूत्रस्वामिनारायण-भाष्ये व्याकरणांशानाम् अध्ययनम्" इति विषये व्याख्यानं प्रदत्तम्।
- १८.११.२०१९ – गुजरातराज्यपाठ्यपुस्तकमण्डल-गान्धीनगरेण आयोजितायां "संस्कृत-मध्यमा-२" इति दर्शनशास्त्रसम्बद्धपाठलेखन-गोष्ठ्यां भागग्रहणं विधाय षट् पाठाः लिखिताः।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनसङ्कायेन २३ तः २७ दिसम्बर २०१९ पर्यन्तम् आयोजितायाः पञ्चदिवसीयायाः "दर्शनेषु पारिभाषिक-पदानां परिचयः" इत्याख्यायाः कार्यशालायाः संयोजनं कृतम्।
- *प्रकाशनम्* - श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "सोमज्योतिः" इति वार्तापत्रस्य २०-२१ संयुक्ताङ्कास्य सम्पादनकार्यं विधाय प्रकाशनं विहितम्।
- गुजरातराज्यपाठ्यपुस्तकमण्डल-गान्धीनगरेण प्रकाशिते "संस्कृत-दर्शन-२ (मध्यमा-१ पाठ्यक्रमः)" इति पाठ्यपुस्तके पञ्च पाठाः प्रकाशिताः।

**डॉ. बी. उमा महेश्वरी**

- देहलीस्थ-अक्षरधाम्नि "The Akshar Purushottam Darshana Conference" मध्ये १५-१७ नवम्बर २०१९ दिनाङ्केषु आयोजितायां राष्ट्रियसङ्गोष्ठ्यां "न्याय-अक्षरपुरुषोत्तमदर्शनयोः जीवस्वरूपम्" इति विषये व्याख्यानं प्रदाय तत्रैव एकस्य सत्रस्य सत्राध्यक्षत्वं निरवहत्।
- १८.११.२०१९ - गुजरातपाठ्यपुस्तकमण्डलद्वारा आयोजितायां गोष्ठ्यां मध्यमपाठ्यक्रमनिर्माणे पाठत्रयस्य लेखनं कृतम्।
- २३ तः २७ दिसम्बर २०१९ दिनाङ्केषु दर्शनसङ्कायेन आयोजितायाः "दर्शनेषु पारिभाषिकपदानां परिचयः" इत्याख्यायाः पञ्चदिवसीयकार्य-शालायाः संयोजनं कृतम्।
- गुजरातपाठ्यपुस्तकमण्डल-गान्धीनगरद्वारा निर्मिते मध्यमा-१ इति अभ्यासक्रमे दर्शनम्-२ विषये पाठचतुष्टयस्य प्रकाशनम्।

## पश्चिमक्षेत्र-अन्तर्विश्वविद्यालय-कबड्डीस्पर्धा



१८ तः २२ नवम्बर २०१९ पर्यन्तं पश्चिमक्षेत्र-अन्तर्विश्वविद्यालय-कबड्डीस्पर्धायां श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य वॉलीबॉल-समूहेन भागं गृहीत्वा उत्कृष्टं प्रदर्शनं विहितम्। अस्यां स्पर्धायां विश्वविद्यालयस्य छात्रैः सह दर्शनम् संस्कृतमहाविद्यालयः, आणदाबाबावेदान्तसंस्कृतमहाविद्यालयः, श्रीअम्बिकासंस्कृत-महाविद्यालयः, नवजागृतिसंस्कृतमहाविद्यालयः, डाकोरसंस्कृतमहाविद्यालयः इत्यादिमहाविद्यालयानां छात्राः अपि भागं गृहीतवन्तः। एतस्य वॉलीबॉल-समूहस्य समूहप्रबन्धकरूपेण प्रो. विनोदकुमार झा कार्यम् अकरोत्।

# महाविद्यालयवार्ताः

## BAPS स्वामिनारायणसंस्कृतमहाविद्यालयः, सारङ्गपुरम्



- ३-११-२०१९ दिनाङ्के सारङ्गपुरस्थस्याऽस्य महाविद्यालयस्य नूतनभवनस्य लोकार्पणमहोत्सवस्समायोजितः। परमपूज्यानां प्रमुखस्वामिमहाराजानां दिव्यसङ्कल्पेन दिव्याशीर्वादैश्च विरचितोऽयं BAPS स्वामिनारायणसंस्कृतमहाविद्यालयः श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन संबद्धोऽभिवर्तते। लोकार्पणमहोत्सवेऽस्मिन् ऐतिहासिकसुवर्णाऽवसरे सद्गुरुवर्याः पू.विवेकसागरस्वामिनः, पूज्याः साधुभद्रेशदासस्वामिनः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहाभागाः, तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो.मुरलीधरशर्ममहोदयाः, कृष्णकुमारसिंहविश्वविद्यालयस्य कुलपतयः प्रो. महीपतसिंहचावडामहोदयाः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतयः एवं च राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरप्राचार्याः प्रो. अर्कनाथचौधरीमहाशयाः, डॉ. दशरथजादवमहाशयाश्चेत्यादयः महानुभावाः सोत्साहम् अनुपमस्य अस्य नूतनस्य ब्रह्मविद्याभवनस्य लोकार्पणमकार्षुः।



- नवदिल्हीस्थित-स्वामिनारायण-अक्षरधामनि जगत्प्रसिद्धविदुषाम् उपस्थितौ त्रिदिनावधिकः अक्षरपुरुषोत्तमदर्शनपरिसंवादः सम्पन्नः। महामहोपाध्यायसाधुभद्रेशदासेन दर्शनमिदमाधारीकृत्य प्रस्थानत्रयीस्वामिनारायणभाष्यं स्वामिनारायणसिद्धान्तसुधाऽऽख्यवादग्रन्थं चाऽभ्यलिखत्। अथ अक्षरपुरुषोत्तमदर्शननिरूपकाणां भाष्यग्रन्थानां वादग्रन्थस्य चाऽऽधारेण भारतीयदार्शनिक-अनुसन्धानसंस्थायाः BAPS (बी.ए.पी.एस.) स्वामिनारायणशोधसंस्थायाश्च संयुक्तोपक्रमेण न्यूदिल्हीस्थितस्वामिनारायण-अक्षरधाम्नि एकः परिसंवादः आयोजितः। अस्य विषय आसीत् – "अक्षरपुरुषोत्तमदर्शनम् – दर्शनान्तरैः सह संवादः"।
- BAPS स्वामिनारायणसंस्थाद्वरा 'The BAPS Swaminarayan Research Journal' इति वार्षिकसामयिकः प्रकाशितं भवति। मुख्यशोधकेन्द्रं देहलिनगरम्। सामयिकस्यास्य सम्पादकः महामहोपाध्यायसाधुभद्रेशदासः वर्तते। प्रतिवर्षम् एकस्य सामयिकस्य उद्घाटनं भवति। १७-११-२०१९ दिनाङ्के अस्य सामयिकस्य द्वितीयाङ्कस्य प्रकाशनं जातम्।
- अमेरिकास्थहार्वर्डयूनिवर्सिटीमध्ये विश्वविद्यालयस्य छात्रः अक्षरः परसाणा BAPS स्वामिनारायणसंस्कृतमहाविद्यालये अधीत्य आचार्यपदवीमारूढः अक्षरपरसाणामहोदयः सम्प्रति अमेरिकादेशस्य हार्वर्डविश्वविद्यालयस्य Harvard Divinity School मध्ये प्रवेशं प्राप्य विशिष्टाध्ययनं विदधाति। तत्र स्थित्वा स न्याय-दर्शनादिविषयानधिकृत्य पाश्चात्यशैल्या विचारविनिमयवैशिष्ट्यरीत्यादीनामभ्यसनं कुर्वते।

## श्रीमुक्तानन्द-संस्कृत-महाविद्यालयस्य वार्षिकोत्सवः



- गुर्जरप्रान्तस्य वलसाडजनपदे स्थितया "शान्तिमन्दिरम्" इत्याख्यया संस्थया सञ्चाल्यमानेन श्रीमुक्तानन्द-संस्कृत-महाविद्यालयेन प्रतिवर्षं दिसम्बर्-मासस्य उत्तरार्धे वर्षिकोत्सवः आचर्यते। प्रतिवर्षमिव २०१९ तमे ख्रीष्टाब्देऽपि २१.१२.२०१९ तः ३१.१२.२०१९ यावत् महाविद्यालये वेददीक्षान्त-समारोहसहितं विविधक्रीडानाम्, शास्त्रीयसङ्गीतस्य, शास्त्रीयकण्ठपाठ-सुभाषित-कण्ठपाठाक्षरश्लोकी-वादविवादादिप्रतियोगिताः समायोजिताः। तत्र आरम्भे दिनद्वये (२१-२२.१२.२०१९) शुक्लयजुर्वेद-माध्यन्दिनसंहितायाः पारायणपुरस्सरं पञ्चमो वेददीक्षान्त-समारोहः जातः। 'दिनाङ्कः२३-२८.१२.०१९ पर्यन्तं पञ्चदिवसेषु परिसरस्य शान्तवातावरणे महाविद्यालयस्य छात्रैः छात्रचरैश्च सङ्गीतशास्त्रे एकल-युगलपद्धतिभिः वेणुमृदङ्गमुरजवादनैः ध्रुपदखयालगानादिभिश्च 'स्वर-माधुरी' प्रस्तुता। अस्यां स्वरमाधुर्यां भारतवर्षस्य ख्यातानां वरिष्ठ-सङ्गीतज्ञानाम् उपस्थितिरपि आसीत्। ऑस्ट्रेलियादेशीयेन विख्यातसङ्गीतकारेण 'लीयो' (Leao) महोदयेनाऽपि 'सेक्सोफोन्' वादनं कृतमासीत्। वार्षिकोत्सवस्य साक्षीभूताः राष्ट्रिय-संस्कृत-संस्थानस्य मुम्बईनगरस्थस्य परिसराचार्यः प्रो. सुदेशकुमारशर्मा, जयपुरपरिसरस्य धर्मशास्त्रविभागाध्यक्षाः प्रो. भगवतीसुदेशवर्याः, साहित्यविभागस्य प्रो. रमाकान्तपाण्डेयवर्याश्च मुख्यविशिष्टसारस्वतातिथिरूपेण समुपस्थिताः आसन्।

## विश्वविद्यालये नवनियुक्तयः


डॉ. शत्रुघ्न पाणिग्राही
सहाचार्यः – वेदः


डॉ. ललितकुमार पटेलः
सहाचार्यः – साहित्यम्


श्री जिगर एम्. भट्टः
सहायकाचार्यः-साहित्यम्


डॉ. विपुलकुमार जादवः
सहायकाचार्यः – वेदः


डॉ. तनुजा अजोतिकर्
सहायकाचार्या-व्याकरणम्


डॉ. आशाबेन माढकः
सहायकाचार्या - पुराणम्

**नवनियुक्तेभ्यः सर्वेभ्यः सहाचार्य-सहायकाचार्येभ्यः विश्वविद्यालपक्षतः सोमज्योतिःपक्षतश्च अभिनन्दनानि विज्ञाप्यन्ते।**

## "गोलपरिभाषा" इति विषये समायोजिता ज्योतिषकार्यशाला




श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसङ्कायस्य ज्योतिषविभागेन २१ त: २५ जनवरी २०२० पर्यन्तम् गोलपरिभाषा विषये पञ्चदिवसीया कार्यशाला समायोजिता आसीत्। कार्यशालायामस्यां विश्वविद्यालयपरिसरच्छात्रैः सह विविधमहाविद्यालयेभ्यः आगताः एकोनविंशतिः छात्राः भागं गृहीतवन्तः। अस्याः उद्घाटनं कुलपतेः प्रो.गोपबन्धु-मिश्रस्य आध्यक्ष्ये सम्पन्नम्। उद्घाटनसत्रे मुख्यातिथिः काशीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागाध्यक्षः प्रो. विनयकुमार पाण्डेयः आसीत्।। कार्यशालायामस्यां प्रो. विनयकुमारपाण्डेयस्य मार्गदर्शने काष्टपट्टिकाभिः प्रायोगिकरूपेण गोलयन्त्रस्य निर्माणम् अभवत्। प्रो. श्यामदेवमिश्रेण कार्यशालायां सङ्गणकमाध्यमेन आकाशे ग्रहाणां वास्तविकी स्थितिः छात्रेभ्यः बोधिता। कार्यशालायाः समापनसत्रे मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थान-जयपुरपरिसरस्य ज्योतिषविभागाध्यक्षः प्रो. श्यामदेव मिश्रः आसीत्। कार्यशालायां वक्तृषु – प्रो. विनयकुमार पाण्डेयः, प्रो.श्यामदेव मिश्रः, डॉ. रमेशचन्द्रशुक्लः, श्रीनित्यानन्द ओझा आसन्। कार्यशालायाः संयोजकः डॉ. रमेशचन्द्र शुक्लः तथा च सहसंयोजकः श्रीनित्यानन्द ओझा आसीत्।

## विश्वविद्यालये नूतनभवननिर्माणादिकं कार्यम्

गुजरातराज्यसर्वकारस्य सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालये नूतनभवनानां निर्माणकार्यं जायमानम् अस्ति। तत्र गार्गी-बालिकाच्छात्रावासः, योगभवनम् इति भवनद्वयस्य निर्माणकार्यं प्रचलत् वर्तते। ग्रन्थालयभवनस्य अतिथिभवनस्य च निर्माणं शीघ्रम् आरप्स्यते। तत्र तलद्वयेन निर्मीयमाणे गार्गीबालिकाछात्रावासभवने शताधिकबालिकानां निवासव्यवस्था भविष्यति। पातञ्जलयोगभवने च युगपत् पञ्चशतं जनाः योगाभ्यासं कर्तुं शक्ष्यन्ति। ७.९१ कोटिपरिमितधनव्ययद्वारा निर्मीयमाणे ग्रन्थालयभवने पञ्चलक्षं यावत् पुस्तकानां संग्रहः भवितुमर्हति। अपि च त्रिशतं पाठकानाम् उपवेशनव्यवस्था, सङ्गणकप्रयोगशाला, सम्मेलनकक्षः, बहूद्देशीयकक्षः इत्यादिसुविधाः भविष्यन्ति। एतेन सह विश्वविद्यालयपरिसरे वाहन-विश्रामालयः, जलसङ्ग्राहिणी, मार्गः इत्यादिकं निर्माणकार्यं जातम् अस्ति। किञ्च गुजरातसर्वकारस्य पक्षतः शैक्षणिकभवनस्योपरितले शिक्षाशास्त्रभवननिर्माणाय, चन्द्रमौलिच्छात्रावासस्य उपरि एकस्य अधिकस्य तलस्य निर्माणार्थम्, उत्तरदिशि भूमेः समतलीकरणार्थं च वित्तं सम्प्राप्तम् अस्ति।






विश्वविद्यालयपरिस निर्मीयमाणानां भवनानां कानिचन सङ्गणकजनितानि चित्राणि



योगभवनस्य निर्माणारम्भे इष्टिकापूजनस्य दृश्यम्